# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2022

## SANADSE06T-SANSKRIT (DSE3/4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### SECTION-A
**(Marks: 20)**

1. अधोलिखितेषु एकः प्रश्नः समाधेयः। 10×1 = 10

(क) वमनाचार्यमनुसृत्य अलङ्कारशब्दस्य अर्थो विशदीक्रियताम्। काव्यविरचने अलङ्कारस्य भूमिका निर्णेया।

(ख) काव्यालङ्कारसूत्रवृत्तिमवलम्ब्य कवीनां प्रकारभेदः सविशदम् उल्लेखनीयः।

2. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) शब्दगुणाः कतिविधाः ? नामत्रयम् उल्लेख्यम्।

(ख) का खलु रीतिः ? सा तु कतिविधा ?

(ग) काव्यालङ्कारसूत्रवृत्तेः प्रसिद्धटीकायाः टीकाकारस्य च नाम उल्लेख्यम्।

(घ) काव्यस्य प्रयोजनं कतिविधम् ? किं खलु काव्यस्य दृष्टप्रयोजनम् ?

(ङ) किं खलु कतकफलम् ? किं वा तस्य कार्य्यम् ?

(च) काव्याङ्गरुपेण विद्यायाः स्वरूपम् उल्लेख्यम्।

(छ) प्रसादगुणस्य लक्षणमुल्लिख्य व्याख्यायताम्।

### SECTION-B
**(Marks: 30)**

3. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10×1 = 10

(क) किं खलु भट्टिकाव्यस्य अपरं नाम ? अस्य काव्यस्य विरचने किमासीत् कवेरुद्देश्यम् ? काव्येऽस्मिन् कतिविधानि काण्डानि परिदृश्यन्ते ? तेषां नामानि उल्लेखनीयानि। तत्र वर्णितो विषय उल्लिख्यताम्। 1+2+1+2+4

(ख) यक्षविनाशकाः निशाचराः कीदृशाः आसन् ? कथं लक्ष्मणः तान् जघान ? राममारीचयोः वाक्कलहः सविस्तारं वर्ण्यताम्। 2+3+5

4. अधोदत्तेषु यथेच्छं द्वयं व्याख्येयम्। 5×2 = 10

(क) तरङ्गसङ्गाच्चपलैः पलाशै-
ज्वालाश्रियं सातिशयां दृधत्नि।
सधूमदीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि॥

(ख) विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोव्यापहृतां पयोभिः।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः॥

(ग) प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम्।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनीशं सहतेऽन्यसङ्गमम्॥

(घ) तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुत कर्म्म धर्म्यम्।
तपोमरुद्भिर्भवतां शराग्निः
सन्धुक्ष्यतां नोऽरिसमिन्धनेषु॥

5. अधोनिर्दिष्टं विषयद्वयमाश्रित्य टीका लेख्या। 5×2 = 10

(क) ताड़का

(ख) जनकः

(ग) मारीचः

(घ) दशरथः

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——